# ॥ অধ্যাত্মরামাযণে বালকাণ্ডম্ ॥

॥ প্রথমঃ সর্গঃ॥

॥ রাম হৃদযম্॥

যঃ পৃথিবীভরবারণায দিবিজৈঃ সংপ্রার্থিতশ্চিন্মযঃ

সন্জাতঃ পৃথিবীতলে রবিকুলে মাযামনুষ্যোঽব্যযঃ ।

নিশ্চক্রং হতরাক্ষসঃ পুনরগাদ্ ব্রহ্মত্বমাদ্যং স্থিরান্

কীর্তিং পাপহরাং বিধায জগতাং তং জানকীশং ভজে ॥ ১॥

বিশ্বোদ্ভবস্থিতিলযাদিষু হেতুমেকং

মাযাশ্রিযং বিগতমাযমচিন্ত্যমূর্তিম্ ।

আনন্দসান্দ্রমমলং নিজবোধরূপং

সিতাপতিং বিদিততত্ত্বমহং নমামি ॥ ২॥

পঠন্তি যে নিত্যমনন্যচেতসঃ

শৃণ্বন্তি চাধ্যাত্মিকসন্জ্ঞিতং শুভম্ ।

রামাযণং সর্বপুরাণসংমতং

নির্ধূতপাপা হরিমেব যান্তি তে ॥ ৩॥

অধ্যাত্মরামাযণমেব নিত্যং

পঠেদ্যদীচ্ছেদ্ভববন্ধমুক্তিম্ ।

গবাং সহস্রাযুতকোটিদানাত্

ফলং লভেদ্যঃ শৃণুযাৎস নিত্যম্ ॥ ৪॥

পুরারিগিরিসম্ভূতা শ্রীরামার্ণবসঙ্গতা ।
অধ্যাত্মরামগঙ্গেযং পুনাতি ভুবনত্রযম্ ॥ ৫॥

কৈলাসাগ্রে কদাচিদ্রবিশতবিমলে মন্দিরে রত্নপীঠে
সন্বিষ্টং ধ্যাননিষ্ঠং ত্রিনযনমভযং সেবিতং সিদ্ধসঙ্ঘৈঃ ।
দেবী বামাঙ্কসংস্থা গিরিবরতনযা পার্বতী ভক্তিনম্রা
প্রাহেদং দেবমীশং সকলমলহরং বাক্যমানন্দকন্দম্ ॥ ৬॥

পার্বত্যুবাচ
নমোঽস্তু তে দেব জগন্নিবাস
সর্বাত্মদৃক্ ত্বং পরমেশ্বরোঽসি ।
পৃচ্ছামি তত্ত্বং পুরুষোত্তমস্য
সনাতনং ত্বং চ সনাতনোঽসি ॥ ৭॥

গোপ্যং যদত্যন্তমনন্যবাচ্যং
বদন্তি ভক্তেষু মহানুভাবাঃ ।
তদপ্যহোঽহং তব দেব ভক্তা
প্রিযোঽসি মে ত্বং বদ যত্তু পৃষ্টম্ ॥ ৮॥

জ্ঞানং সবিজ্ঞানমথানুভক্তিবৈরাগ্যযুক্তং

চ মিতং বিভাস্বত্ ।
জানাম্যহং যোষিদপি ত্বদুক্তং
যথা তথা ব্রূহি তরন্তি যেন ॥ ৯॥

পৃচ্ছামি চান্যচ্চ পরং রহস্যং
তদেব চাগ্রে বদ বারিজাক্ষ ।
শ্রীরামচন্দ্রেঽখিললোকসারে
ভক্তির্দৃঢা নৌর্ভবতি প্রসিদ্ধা ॥ ১০॥

ভক্তিঃ প্রসিদ্ধা ভবমোক্ষণায
নান্যত্ততঃ সাধনমস্তি কিঞ্চিত্ ।
তথাপি হৃৎসন্শযবন্ধনং মে
বিভেত্তুমর্হস্যমলোক্তিভিস্ত্বম্ ॥ ১১॥

বদন্তি রামং পরমেকমাদ্যং
নিরস্তমাযাগুণসপ্রবাহম্ ।
ভজন্তি চাহর্নিশমপ্রমত্তাঃ
পরং পদং যান্তি তথৈব সিদ্ধাঃ ॥ ১২॥

বদন্তি কেচিৎপরমোঽপি রামঃ
স্বাবিদ্যযা সন্বৃতমাত্মসন্জ্ঞম্ ।
জানাতি নাত্মানমতঃ পরেণ

সম্বোধিতো বেদ পরাত্মতত্ত্বম্ ॥ ১৩॥

যদি স্ম জানাতি কুতো বিলাপঃ

সীতাকৃতেঽনেন কৃতঃ পরেণ ।

জানাতি নৈবং যদি কেন সেব্যঃ

সমো হি সর্বৈরপি জীবজাতৈঃ ॥ ১৪॥

অত্রোত্তরং কিং বিদিতং ভবদ্ভিঃ

তদ্ব্রূত মে সন্শযভেদি বাক্যম্ ॥ ১৫॥

শ্রীমহাদেব উবাচ

ধন্যাসি ভক্তাসি পরাত্মনস্ত্বং

যজ্জ্ঞাতুমিচ্ছা তব রামতত্ত্বম্ ।

পুরা ন কেনাপ্যভিচোদিতোঽহং

বক্তুং রহস্যং পরমং নিগূঢম্ ॥ ১৬॥

ত্বযাদ্য ভক্ত্যা পরিনোদিতোঽহং

বক্ষ্যে নমস্কৃত্য রঘূত্তমং তে ।

রামঃ পরাত্মা প্রকৃতেরনাদিরানন্দ

একঃ পুরুষোত্তমো হি ॥ ১৭॥

স্বমাযযা কৃৎস্নমিদং হি সৃষ্ট্বা

নভোবদন্তর্বহিরাস্থিতো যঃ।
সর্বান্তরস্থোঽপি নিগূঢ আত্মা
স্বমাযযা সৃষ্টমিদং বিচষ্টে ॥ ১৮॥

জগন্তি নিত্যং পরিতো ভ্রমন্তি
যৎসন্নিধৌ চুম্বকলোহবদ্ধি।
এতন্ন জানন্তি বিমূঢচিত্তাঃ
স্বাবিদ্যযা সন্বৃতমানসা যে ॥ ১৯॥

স্বাজ্ঞানমপ্যাত্মনি শুদ্ধবুদ্ধে
স্বারোপযন্তীহ নিরস্তমাযে।
সন্সারমেবানুসরন্তি তে বৈ
পুত্রাদিসক্তাঃ পুরুকর্মযুক্তাঃ ॥ ২০॥

যথাঽপ্রকাশো ন তু বিদ্যতে রবৌ
জ্যোতিঃস্বভাবে পরমেশ্বরে তথা।
বিশুদ্ধবিজ্ঞানঘনে রঘূত্তমেঽবিদ্যা
কথং স্যাৎপরতঃ পরাত্মনি ॥ ২১॥

যথা হি চাক্ষ্ণা ভ্রমতা গৃহাদিকং
বিনষ্টদৃষ্টের্ভ্রমতীব দৃশ্যতে।
তথৈব দেহেন্দ্রিযকর্তুরাত্মনঃ

কৃতে পরেঽধ্যস্য জনো বিমুহ্যতি ॥ ২২॥

নাহো ন রাত্রিঃ সবিতুর্যথা ভবেত্
প্রকাশরূপাব্যভিচারতঃ ক্বচিত্ ।
জ্ঞানং তথাজ্ঞানমিদং দ্বযং হরৌ
রামে কথং স্থাস্যতি শুদ্ধচিদ্ঘনে ॥ ২৩॥

তস্মাৎপরানন্দমযে রঘূত্তমে
বিজ্ঞানরূপে হি ন বিদ্যতে তমঃ ।
অজ্ঞানসাক্ষিণ্যরবিন্দলোচনে
মাযাশ্রযত্বান্ন হি মোহকারণম্ ॥ ২৪॥

অত্র তে কথযিষ্যামি রহস্যমপি দুর্লভম্ ।
সীতারামমরুৎসূনুসম্বাদং মোক্ষসাধনম্ ॥ ২৫॥

পুরা রামাযণে রামে রাবণং দেবকণ্টকম্ ।
হত্বা রণে রণশ্লাঘী সপুত্রবলবাহনম্ ॥ ২৬॥

সীতযা সহ সুগ্রীবলক্ষ্মণাভ্যাং সমন্বিতঃ ।
অযোধ্যামগমদ্রামো হনূমৎপ্রমুখৈর্বৃতঃ ॥ ২৭॥

অভিষিক্তঃ পরিবৃতো বসিষ্ঠাদ্যৈর্মহাত্মভিঃ ।

সিন্হাসনে সমাসীনঃ কোটিসূর্যসমপ্রভঃ ॥ ২৮॥

দৃষ্ট্বা তদা হনূমন্তং প্রাঞ্জলিং পুরতঃ স্থিতম্ ।
কৃতকার্যং নিরাকাঙ্ক্ষং জ্ঞানাপেক্ষং মহামতিম্ ॥ ২৯॥

রামঃ সীতামুবাচেদং ব্রূহি তত্ত্বং হনূমতে ।
নিষ্কল্মষোঽযং জ্ঞানস্য পাত্রং নো নিত্যভক্তিমান্ ॥ ৩০॥

তথেতি জানকী প্রাহ তত্ত্বং রামস্য নিশ্চিতম্ ।
হনূমতে প্রপন্নায সীতা লোকবিমোহিনী ॥ ৩১॥

সীতোবাচ
রামং বিদ্ধি পরং ব্রহ্ম সচ্চিদানন্দমদ্বযম্ ।
সর্বোপাধিবিনির্মুক্তং সত্তামাত্রমগোচরম্ ॥ ৩২॥

আনন্দং নির্মলং শান্তং নির্বিকারং নিরঞ্জনম্ ।
সর্বব্যাপিনমাত্মানং স্বপ্রকাশমকল্মষম্ ॥ ৩৩॥

মাং বিদ্ধি মূলপ্রকৃতিং সর্গস্থিত্যন্তকারিণীম্ ।
তস্য সন্নিধিমাত্রেণ সৃজামীদমতন্দ্রিতা ॥ ৩৪॥

তৎসান্নিধ্যান্মযা সৃষ্টং তস্মিন্নারোপ্যতেঽবুধৈঃ ।

অযোধ্যানগরে জন্ম রঘুবংশেঽতিনির্মলে ॥ ৩৫॥

বিশ্বামিত্রসহায়ত্বং মখসংরক্ষণং ততঃ ।
অহল্যাশাপশমনং চাপভঙ্গো মহেশিতুঃ ॥ ৩৬॥

মৎপাণিগ্রহণং পশ্চাদ্ভার্গবস্য মদক্ষয়ঃ ।
অযোধ্যানগরে বাসো ময়া দ্বাদশবার্ষিকঃ ॥ ৩৭॥

দণ্ডকারণ্যগমনং বিরাধবধ এব চ ।
মায়ামারীচমরণং মায়াসীতাহৃতিস্তথা ॥ ৩৮॥

জটায়ুষো মোক্ষলাভঃ কবন্ধস্য তথৈব চ ।
শবর্যাঃ পূজনং পশ্চাৎসুগ্রীবেণ সমাগমঃ ॥ ৩৯॥

বালিনশ্চ বধঃ পশ্চাৎসীতান্বেষণমেব চ ।
সেতুবন্ধশ্চ জলধৌ লঙ্কায়াশ্চ নিরোধনম্ ॥ ৪০॥

রাবণস্য বধো যুদ্ধে সপুত্রস্য দুরাত্মনঃ ।
বিভীষণে রাজ্যদানং পুষ্পকেণ ময়া সহ ॥ ৪১॥

অযোধ্যাগমনং পশ্চাদ্রাজ্যে রামাভিষেচনম্ ।
এবমাদীনি কর্মাণি ময়ৈবাচরিতান্যপি

আরোপযন্তি রামেঽস্মিন্নির্বিকারেঽখিলাত্মনি ॥ ৪২॥

রামো ন গচ্ছতি ন তিষ্ঠতি নানুশোচত্যাকাঙ্ক্ষতে
ত্যজতি নো ন করোতি কিঞ্চিত্ ।
আনন্দমূর্তিরচলঃ পরিণামহীনো
মায়াগুণাননুগতো হি তথা বিভাতি ॥ ৪৩॥

ততো রামঃ স্বযং প্রাহ হনূমন্তমুপস্থিতম্ ।
শৃণু তত্ত্বং প্রবক্ষ্যামি হ্যাত্মানাত্মপরাত্মনাম্ ॥ ৪৪॥

আকাশস্য যথা ভেদস্ত্রিবিধো দৃশ্যতে মহান্ ।
জলাশযে মহাকাশস্তদবচ্ছিন্ন এব হি ।
প্রতিবিংবাখ্যমপরং দৃশ্যতে ত্রিবিধং নভঃ ॥ ৪৫॥

বুদ্ধ্যবচ্ছিন্নচৈতন্যমেকং পূর্ণমথাপরম্ ।
আভাসস্ত্বপরং বিম্বভূতমেবং ত্রিধা চিতিঃ ॥ ৪৬॥

সাভাসবুদ্ধেঃ কর্তৃত্বমবিচ্ছিন্নেঽবিকারিণি ।
সাক্ষিণ্যারোপ্যতে ভ্রান্ত্যা জীবত্বং চ তথা বুধৈঃ ॥ ৪৭॥

আভাসস্তু মৃষা বুদ্ধিরবিদ্যাকার্যমুচ্যতে ।
অবিচ্ছিন্নং তু তদ্ব্রহ্ম বিচ্ছেদস্তু বিকল্পতঃ ॥ ৪৮॥

অবিচ্ছিন্নস্য পূর্ণেন একত্বং প্রতিপাদ্যতে।

তত্ত্বমস্যাদিবাক্যৈশ্চ সাভাসস্যাহমস্তথা ॥ ৪৯॥

ঐক্যজ্ঞানং যদোৎপন্নং মহাবাক্যেন চাত্মনোঃ।

তদাঽবিদ্যা স্বকার্যৈশ্চ নশ্যত্যেব ন সন্শযঃ ॥ ৫০॥

এতদ্বিজ্ঞায মদ্ভক্তো মদ্ভাবাযোপপদ্যতে।

মদ্ভক্তিবিমুখানাং হি শাস্ত্রগর্তেষু মুহ্যতাম্।

ন জ্ঞানং ন চ মোক্ষঃ স্যাত্তেষাং জন্মশতৈরপি ॥ ৫১॥

ইদং রহস্যং হৃদযং মমাত্মনো

মযৈব সাক্ষাৎকথিতং তবানঘ।

মদ্ভক্তিহীনায শঠায ন ত্বযা

দাতব্যমৈন্দ্রাদপি রাজ্যতোঽধিকম্ ॥ ৫২॥

শ্রীমহাদেব উবাচ

এতত্তেঽভিহিতং দেবি শ্রীরামহৃদযং মযা।

অতিগুহ্যতমং হৃদ্যং পবিত্রং পাপশোধনম্ ॥ ৫৩॥

সাক্ষাদ্রামেণ কথিতং সর্ববেদান্তসন্গ্রহম্।

যঃ পঠেৎসততং ভক্ত্যা স মুক্তো নাত্র সন্শযঃ ॥ ৫৪॥

ব্রহ্মহত্যাদি পাপানি বহুজন্মার্জিতান্যপি ।

নশ্যন্ত্যেব ন সন্দেহো রামস্য বচনং যথা ॥ ৫৫॥

যোঽতিভ্রষ্টোঽতিপাপী পরধনপরদারেষু নিত্যোদ্যতো বা

স্তেযী ব্রহ্মঘ্নমাতাপিতৃবধনিরতো যোগিবৃন্দাপকারী

যঃ সংপূজ্যাভিরামং পঠতি চ হৃদযং রামচন্দ্রস্য ভক্ত্যা

যোগীন্দ্রৈরপ্যলভ্যং পদমিহ লভতে সর্বদেবৈঃ স পূজ্যম্ ॥ ৫৬॥

ইতি শ্রীমদধ্যাত্মরামাযণে উমামহেশ্বরসম্বাদে বালকাণ্ডে

শ্রীরামহৃদযং নাম প্রথমঃ সর্গঃ ॥ ১॥

॥ বালকাণ্ডম্॥

॥ দ্বিতীযঃ সর্গঃ॥

পার্বত্যুবাচ

ধন্যাস্ম্যনুগৃহীতাস্মি কৃতার্থাস্মি জগৎপ্রভো ।

বিচ্ছিন্নো মেঽতিসন্দেহগ্রন্থির্ভবদনুগ্রহাত্ ॥ ১॥

ত্বন্মুখাদ্গলিতং রামতত্ত্বামৃতরসাযনম্ ।

পিবন্ত্যা মে মনো দেব ন তৃপ্যতি ভবাপহম্ ॥ ২॥

শ্রীরামস্য কথা ত্বত্তঃ শ্রুতা সঙ্ক্ষেপতো মযা ।

ইদানীং শ্রোতুমিচ্ছামি বিস্তরেণ স্ফুটাক্ষরম্ ॥ ৩॥

শ্রীমহাদেব উবাচ

শৃণু দেবি প্রবক্ষ্যামি গুহ্যাদ্গুহ্যতরং মহত্ ।

অধ্যাত্মরামচরতিং রামেণোক্তং পুরা মম ॥ ৪ ।

তদদ্য কথযিষ্যামি শৃণু তাপত্রযাপহম্ ।

যচ্ছ্রুত্বা মুচ্যতে জন্তুরজ্ঞানোত্থমহাভযাত্ ।

প্রাপ্নোতি পরমামৃদ্ধিম্ দীর্ঘাযুঃ পুত্রসন্ততিম্ ॥ ৫॥

ভূমির্ভারেণ মগ্না দশবদনমুখাশেষরক্ষোগণানাং

ধৃত্বা গোরূপমাদৌ দিবিজমুনিজনৈঃ সাকমব্জাসনস্য ।

গত্বা লোকং রুদন্তী ব্যসনমুপগতং ব্রহ্মণে প্রাহ সর্বং

ব্রহ্মা ধ্যাত্বা মুহূর্তং সকলমপি হৃদাবেদশেষাত্মকত্বাত্ ॥ ৬॥

তস্মাৎক্ষীরসমুদ্রতীরমগমদ্ ব্রহ্মাথ দেবৈর্বৃতো

দেব্যা চাখিললোকহৃৎস্থমজরং সর্বজ্ঞমীশং হরিম্ ।

অস্তৌষীচ্ছ্রুতিসিদ্ধনির্মলপদৈঃ স্তোত্রৈঃ পুরাণোদ্ভবৈঃ

ভক্ত্যা গদ্গদযা গিরাতিবিমলৈরানন্দবাষ্পৈর্বৃতঃ ॥ ৭॥

ততঃ স্ফুরৎসহস্রাংশুসহস্রসদৃশপ্রভঃ ।

আবিরাসীদ্ধরিঃ প্রাচ্যাং দিশাং ব্যপনযংস্তমঃ ॥ ৮॥

কথঞ্চিদ্দৃষ্টবান্ ব্রহ্মা দুর্দর্শমকৃতাত্মনাম্ ।

ইন্দ্রনীলপ্রতীকাশং স্মিতাস্যং পদ্মলোচনম্ ॥ ৯॥

কিরীটহারকেযূরকুণ্ডলৈঃ কটকাদিভিঃ ।

বিভ্রাজমানং শ্রীবৎসকৌস্তুভপ্রভযান্বিতম্ ॥ ১০॥

স্তুবদ্ভিঃ সনকাদ্যৈশ্চ পার্ষদৈঃ পরিবেষ্টিতম্ ।

শঙ্খচক্রগদাপদ্মবনমালাবিরাজিতম্ ॥ ১১॥

স্বর্ণযজ্ঞোপবীতেন স্বর্ণবর্ণাম্বরেণ চ ।

শ্রিযা ভূম্যা চ সহিতং গরুডোপরি সংস্থিতম্ ॥ ১২॥

হর্ষগদ্গদযা বাচা স্তোতুং সমুপচক্রমে ॥ ১৩॥

ব্রহ্মোবাচ

নতোঽস্মি তে পদং দেব প্রাণবুদ্ধীন্দ্রিযাত্মভিঃ ।

যচ্চিন্ত্যতে কর্মপাশাদ্ধৃদি নিত্যং মুমুক্ষুভিঃ ॥ ১৪॥

মাযযা গুণময্যা ত্বম্ সৃজস্যবসি লুম্পসি ।

জগত্তেন ন তে লেপ আনন্দানুভবাত্মনঃ ॥ ১৫॥

তথা শুদ্ধির্ন দুষ্টানাং দানাধ্যযনকর্মভিঃ ।

শুদ্ধাত্মতা তে যশসি সদা ভক্তিমতাং যথা ॥ ১৬॥

অতস্তবাঙ্ঘ্রির্মে দৃষ্টশ্চিত্তদোষাপনুত্তয়ে ।
সদ্যোঽন্তর্হৃদয়ে নিত্যং মুনিভিঃ সাত্ত্বতৈর্বৃতঃ ॥ ১৭॥

ব্রহ্মাদ্যৈঃ স্বার্থসিদ্ধ্যর্থমস্মাভিঃ পূর্বসেবিতঃ ।
অপরোক্ষানুভূত্যর্থং জ্ঞানিভির্হৃদি ভাবিতঃ ॥ ১৮॥

তবাঙ্ঘ্রিপূজানির্মাল্যতুলসীমালয়া বিভো ।
স্পর্ধতে বক্ষসি পদং লব্ধ্বাপি শ্রীঃ সপত্নিবত্ ॥ ১৯॥

অতস্ত্বৎপাদভক্তেষু তব ভক্তিঃ শ্রিয়োঽধিকা ।
ভক্তিমেবাভিবাঞ্ছন্তি ত্বদ্ভক্তাঃ সারবেদিনঃ ॥ ২০॥

অতস্ত্বৎপাদকমলে ভক্তিরেব সদাস্তু মে ।
সংসারাময়তপ্তানাং ভেষজং ভক্তিরেব তে ॥ ২১॥

ইতি ব্রুবন্তং ব্রহ্মাণং বভাষে ভগবান্ হরিঃ ।
কিং করোমীতি তং বেধাঃ প্রত্যুবাচাতিহর্ষিতঃ ॥ ২২॥

ভগবন্ রাবণো নাম পৌলস্ত্যতনয়ো মহান্ ।
রাক্ষসানামধিপতির্মদ্দত্তবরদর্পিতঃ ॥ ২৩॥

ত্রিলোকীং লোকপালাংশ্চ বাধতে বিশ্ববাধকঃ ।

মানুষেণ মৃতিস্তস্য ময়া কল্যাণ কল্পিতা ॥ ২৪॥

অতস্ত্বং মানুষো ভূত্বা জহি দেবরিপুং প্রভো ॥ ২৫॥

শ্রীভগবানুবাচ

কশ্যপস্য বরো দত্তস্তপসা তোষিতেন মে ।

যাচিতঃ পুত্রভাবায় তথেত্যঙ্গীকৃতং ময়া ।

স ইদানীং দশরথো ভূত্বা তিষ্ঠতি ভূতলে ॥ ২৬॥

তস্যাহং পুত্রতামেত্য কৌসল্যায়াং শুভে দিনে ।

চতুর্ধাত্মানমেবাহং সৃজামীতরযোঃ পৃথক্ ॥ ২৭॥

যোগমায়াপি সীতেতি জনকস্য গৃহে তদা ।

উৎপৎস্যতে তয়া সার্ধং সর্বং সম্পাদয়াম্যহম্ ।

ইত্যুক্ত্বান্তর্দধে বিষ্ণুর্ব্রহ্মা দেবানথাব্রবীত্ ॥ ২৮॥

ব্রহ্মোবাচ

বিষ্ণুর্মানুষরূপেণ ভবিষ্যতি রঘোঃ কুলে ॥ ২৯॥

যূযং সৃজধ্বং সর্বেঽপি বানরেষ্বংশসম্ভবান্ ।

বিষ্ণোঃ সহায়ং কুরুত যাবৎস্থাস্যতি ভূতলে ॥ ৩০॥

ইতি দেবান্ সমাদিশ্য সমাশ্বাস্য চ মেদিনীম্ ।

যযৌ ব্রহ্মা স্বভবনং বিজ্বরঃ সুখমাস্থিতঃ ॥ ৩১॥

দেবাশ্চ সর্বে হরিরূপধারিণঃ

স্থিতাঃ সহায়ার্থমিতস্ততো হরেঃ ।

মহাবলাঃ পর্বতবৃক্ষযোধিনঃ

প্রতীক্ষমাণা ভগবন্তমীশ্বরম্ ॥ ৩২॥

ইতি শ্রীমদধ্যাত্মরামায়ণে উমামহেশ্বরসম্বাদে

বালকাণ্ডে দ্বিতীয়ঃ সর্গঃ ॥ ২॥

॥ অধ্যাত্ম রামায়ণম্ ॥

॥ বালকাণ্ডম্ ॥

॥ তৃতীয়ঃ সর্গঃ ॥

শ্রীমহাদেব উবাচ

অথ রাজা দশরথঃ শ্রীমান্ সত্যপরায়ণঃ ।

অয়োধ্যাধিপতির্বীরঃ সর্বলোকেষু বিশ্রুতঃ ॥ ১॥

সোঽনপত্যত্বদুঃখেন পীড়িতো গুরুমেকদা ।

বসিষ্ঠং স্বকুলাচার্যমভিবাদ্যেদমব্রবীত্ ॥ ২॥

স্বামিন্ পুত্রাঃ কথং মে স্যুঃ সর্বলক্ষণলক্ষিতাঃ ।

পুত্রহীনস্য মে রাজ্যং সর্বং দুঃখায কল্পতে ॥ ৩॥

ততোঽব্রবীদ্বসিষ্ঠস্তং ভবিষ্যন্তি সুতাস্তব ।

চত্বারঃ সত্ত্বসম্পন্না লোকপালা ইবাপরাঃ ॥ ৪॥

শান্তাভর্তারমানীয ঋষ্যশৃঙ্গং তপোধনম্ ।

অস্মাভিঃ সহিতঃ পুত্রকামেষ্টিং শীঘ্রমাচর ॥ ৫॥

তথেতি মুনিমানীয মন্ত্রিভিঃ সহিতঃ শুচিঃ ।

যজ্ঞকর্ম সমারেভে মুনিভির্বীতকল্মষৈঃ ॥ ৬॥

শ্রদ্ধযা হূযমানেঽগ্নৌ তপ্তজাম্বূনদপ্রভঃ ।

পাযসং স্বর্ণপাত্রস্থং গৃহীত্বোবাচ হব্যবাট্ ॥ ৭॥

গৃহাণ পাযসং দিব্যং পুত্রীযং দেবনির্মিতম্ ।

লপ্স্যসে পরমাত্মানং পুত্রত্বেন ন সংশযঃ ॥ ৮॥

ইত্যুক্ত্বা পাযসং দত্ত্বা রাজ্ঞে সোঽন্তর্দধেঽনলঃ ।

ববন্দে মুনিশার্দূলৌ রাজা লব্ধমনোরথঃ ॥ ৯॥

বসিষ্ঠঋষ্যশৃঙ্গাভ্যামনুজ্ঞাতো দদৌ হবিঃ ।

কৌসল্যাযৈ সকৈকেয্যৈ অর্ধমর্ধং প্রযত্নতঃ ॥ ১০॥

ততঃ সুমিত্রা সম্প্রাপ্তা জগৃহ্ণুঃ পৌত্রিকং চরুম্ ।

কৌসল্যা তু স্বভাগার্ধং দদৌ তস্যৈ মুদান্বিতা ॥ ১১॥

কৈকেযী চ স্বভাগার্ধং দদৌ প্রীতিসমন্বিতা ।

উপভুজ্য চরুং সর্বাঃ স্ত্রিযো গর্ভসমন্বিতাঃ ॥ ১২॥

দেবতা ইব রেজুস্তাঃ স্বভাসা রাজমন্দিরে ।

দশমে মাসি কৌসল্যা সুষুবে পুত্রমদ্ভুতম্ ॥ ১৩॥

মধুমাসে সিতে পক্ষে নবম্যাং কর্কটে শুভে ।

পুনর্বস্বৃক্ষসহিতে উচ্চস্থে গ্রহপঞ্চকে ॥ ১৪॥

মেষং পূষণি সম্প্রাপ্তে পুষ্পবৃষ্টিসমাকুলে ।

আবিরাসীজ্জগন্নাথঃ পরমাত্মা সনাতনঃ ॥ ১৫॥

নীলোৎপলদলশ্যামঃ পীতবাসাশ্চতুর্ভুজঃ ।

জলজারুণনেত্রান্তঃ স্ফুরৎকুণ্ডলমণ্ডিতঃ ॥ ১৬॥

সহস্রার্কপ্রতীকাশঃ কিরীটী কুঞ্চিতালকঃ ।

শঙ্খচক্রগদাপদ্মবনমালাবিরাজিতঃ ॥ ১৭॥

অনুগ্রহাখ্যহৃৎস্থেন্দুসূচকস্মিতচন্দ্রিকঃ ।

করুণারসসম্পূর্ণবিশালোৎপললোচনঃ ।
শ্রীবৎসহারকেয়ূরনূপুরাদিবিভূষণঃ ॥ ১৮॥

দৃষ্ট্বা তং পরমাত্মানং কৌসল্যা বিস্ময়াকুলা ।
হর্ষাশ্রুপূর্ণনয়না নত্বা প্রাঞ্জলিরব্রবীত্ ॥ ১৯॥

কৌসল্যোবাচ
দেবদেব নমস্তেঽস্তু শঙ্খচক্রগদাধর ।
পরমাত্মাচ্যুতোঽনন্তঃ পূর্ণস্ত্বং পুরুষোত্তমঃ ॥ ২০॥

বদন্ত্যগোচরং বাচাং বুদ্ধ্যাদীনামতীন্দ্রিয়ম্ ।
ত্বাং বেদবাদিনঃ সত্তামাত্রং জ্ঞানৈকবিগ্রহম্ ॥ ২১॥

ত্বমেব মায়য়া বিশ্বং সৃজস্যবসি হংসি চ ।
সত্ত্বাদিগুণসন্যুক্তস্তুর্য এবামলঃ সদা ॥ ২২॥

করোষীব ন কর্তা ত্বং গচ্ছসীব ন গচ্ছসি ।
শৃণোষি ন শৃণোষীব পশ্যসীব ন পশ্যসি ॥ ২৩॥

অপ্রাণো হ্যমনাঃ শুদ্ধ ইত্যাদি শ্রুতিরব্রবীত্ ।
সমঃ সর্বেষু ভূতেষু তিষ্ঠন্নপি ন লক্ষ্যসে ॥ ২৪॥

অজ্ঞানধ্বান্তচিত্তানাং ব্যক্ত এব সুমেধসাম্ ।

জঠরে তব দৃশ্যন্তে ব্রহ্মাণ্ডাঃ পরমাণবঃ ॥ ২৫॥

ত্বং মমোদরসম্ভূত ইতি লোকান্ বিডম্বসে ।

ভক্তেষু পারবশ্যং তে দৃষ্টং মেঽদ্য রঘূত্তম ॥ ২৬॥

সম্সারসাগরে মগ্না পতিপুত্রধনাদিষু ।

ভ্রমামি মাযযা তেঽদ্য পাদমূলমুপাগতা ॥ ২৭॥

দেব ত্বদ্রূপমেতন্মে সদা তিষ্ঠতু মানসে ।

আবৃণোতু ন মাং মাযা তব বিশ্ববিমোহিনী ॥ ২৮॥

উপসন্হর বিশ্বাত্মন্নদো রূপমলৌকিকম্ ।

দর্শযস্ব মহানন্দবালভাবং সুকোমলম্ ।

ললিতালিঙ্গনালাপৈস্তরিষ্যাম্যুৎকটং তমঃ ॥ ২৯॥

শ্রীভগবানুবাচ

যদ্যদিষ্টং তবাস্ত্যম্ব তত্তদ্ভবতু নান্যথা ॥ ৩০॥

অহং তু ব্রহ্মণা পূর্বং ভূমের্ভারাপনুত্তযে ।

প্রার্থিতো রাবণং হন্তুং মানুষত্বমুপাগতঃ ॥ ৩১॥

ত্বযা দশরথেনাহং তপসারাধিতঃ পুরা ।
মৎপুত্রত্বাভিকাঙ্ক্ষিণ্যা তথা কৃতমনিন্দিতে ॥ ৩২ ॥

রূপমেতত্ত্বযা দৃষ্টং প্রাক্তনং তপসঃ ফলম্ ।
মদ্দর্শনং বিমোক্ষায কল্পতে হ্যন্যদুর্লভম্ ॥ ৩৩॥

সম্বাদমাবযোর্যস্তু পঠেদ্বা শৃণুযাদপি ।
স যাতি মম সারূপ্যং মরণে মৎস্মৃতিং লভেৎ ॥ ৩৪ ॥

ইত্যুক্ত্বা মাতরং রামো বালো ভূত্বা রুরোদ হ ।
বালত্বেঽপীন্দ্রনীলাভো বিশালাক্ষোঽতিসুন্দরঃ ॥ ৩৫ ॥

বালারুণপ্রতীকাশো লালিতাখিললোকপঃ ।
অথ রাজা দশরথঃ শ্রুত্বা পুত্রোদ্ভবোৎসবম্ ।
আনন্দার্ণবমগ্নোঽসাবাযযৌ গুরুণা সহ ॥ ৩৬॥

রামং রাজীবপত্রাক্ষং দৃষ্ট্বা হর্ষাশ্রুসম্প্লুতঃ ।
গুরুণা জাতকর্মাণি কর্তব্যানি চকার সঃ ॥ ৩৭॥

কৈকেযী চাথ ভরতমসূত কমলেক্ষণা ।
সুমিত্রাযাং যমৌ জাতৌ পূর্ণেন্দুসদৃশাননৌ ॥ ৩৮॥

*Stotram Digitalized By [Sanskritdocuments.org](http://Sanskritdocuments.org)*

তদা গ্রামসহস্রাণি ব্রাহ্মণেভ্যো মুদা দদৌ ।
সুবর্ণানি চ রত্নানি বাসাংসি সুরভীঃ শুভাঃ ॥ ৩৯॥

যস্মিন্ রমন্তে মুনযো বিদ্যযা জ্ঞানবিপ্লবে ।
তং গুরুঃ প্রাহ রামেতি রমণাদ্রাম ইত্যপি ॥ ৪০॥

ভরণাদ্ভরতো নাম লক্ষ্মণং লক্ষণান্বিতং ।
শত্রুঘ্নং শত্রুহন্তারমেবং গুরুরভাষত ॥ ৪১॥

লক্ষ্মণো রামচন্দ্রেণ শত্রুঘ্নো ভরতেন চ ।
দ্বন্দ্বীভূয চরন্তৌ তৌ পাযসাংশানুসারতঃ ॥ ৪২॥

রামস্তু লক্ষ্মণেনাথ বিচরন্ বাললীলযা ।
রমযামাস পিতরৌ চেষ্টিতৈর্মুগ্ধভাষিতৈঃ ॥ ৪৩॥

ভালে স্বর্ণমযাশ্বত্থপর্ণমুক্তাফলপ্রভম্ ।
কণ্ঠে রত্নমণিব্রাতমধ্যদ্বীপিনখাঞ্চিতম্ ॥ ৪৪॥

কর্ণযোঃ স্বর্ণসম্পন্নরত্নার্জুনসটালুকম্ ।
শিঞ্জানমণিমঞ্জীরকটিসূত্রাঙ্গদৈর্বৃতম্ ॥ ৪৫॥

স্মিতবক্ত্রাল্পদশনমিন্দ্রনীলমণিপ্রভম্ ।

অঙ্গণে রিঙ্গমাণং তং তর্ণকাননু সর্বতঃ ।

দৃষ্ট্বা দশরথো রাজা কৌসল্যা মুমুদে তদা ॥ ৪৬॥

ভোক্ষ্যমাণো দশরথো রামমেহীতি চাসকৃত্ ।

আহ্বযত্যতিহর্ষেণ প্রেম্ণা নাযাতি লীলযা ॥ ৪৭॥

আনযেতি চ কৌসল্যামাহ সা সস্মিতা সুতম্ ।

ধাবত্যপি ন শক্নোতি স্প্রষ্টুং যোগিমনোগতিম্ ॥ ৪৮॥

প্রহসন্ স্বযমাযাতি কর্দমাঙ্কিতপাণিনা ।

কিঞ্চিদ্গৃহীত্বা কবলং পুনরেব পলাযতে ॥ ৪৯॥

কৌসল্যা জননী তস্য মাসি মাসি প্রকুর্বতী ।

বাযনানি বিচিত্রাণি সমলঙ্কৃত্য রাঘবম্ ॥ ৫০॥

অপূপান্ মোদকান্ কৃত্বা কর্ণশষ্কুলিকাস্তথা ।

কর্ণপূরাংশ্চ বিবিধান্ বর্ষবৃদ্ধৌ চ বাযনম্ ॥ ৫১॥

গৃহকৃত্যং তযা ত্যক্তং তস্য চাপল্যকারণাত্ ।

একদা রঘুনাথোঽসৌ গতো মাতরমন্তিকে ॥ ৫২॥

ভোজনং দেহি মে মাতর্ন শ্রুতং কার্যসক্তযা ।

ততঃ ক্রোধেন ভাণ্ডানি লগুডেনাহনত্তদা ॥ ৫৩॥

শিক্যস্থং পাতযামাস গব্যং চ নবনীতকম্ ।
লক্ষ্মণায দদৌ রামো ভরতায যথাক্রমম্ ॥ ৫৪॥

শত্রুঘ্নায দদৌ পশ্চাদ্দধি দুগ্ধং তথৈব চ ।
সূদেন কথিতে মাত্রে হাস্যং কৃত্বা প্রধাবতি ॥ ৫৫॥

আগতাং তাং বিলোক্যাথ ততঃ সর্বৈঃ পলাযিতম্ ।
কৌসল্যা ধাবমানাপি প্রস্খলন্তী পদে পদে ॥ ৫৬॥

রঘুনাধং করে ধৃত্বা কিঞ্চিন্নোবাচ ভামিনী ।
বালভাবং সমাশ্রিত্য মন্দং মন্দং রুরোদ হ ॥ ৫৭॥

তে সর্বে লালিতা মাত্রা গাঢমালিঙ্গ্য যত্নতঃ ।
এবমানন্দসন্দোহজগদানন্দকারকঃ ॥ ৫৮॥

মাযাবালবপুর্ধৃত্বা রমযামাস দম্পতী ।
অথ কালেন তে সর্বে কৌমারং প্রতিপেদিরে ॥ ৫৯॥

উপনীতা বসিষ্ঠেন সর্ববিদ্যাবিশারদাঃ ।
ধনুর্বেদে চ নিরতাঃ সর্বশাস্ত্রার্থবেদিনঃ ॥ ৬০॥

বভূবুর্জগতাং নাথা লীলযা নররূপিণঃ ।
লক্ষ্মণস্তু সদা রামমনুগচ্ছতি সাদরম্ ॥ ৬১॥

সেব্যসেবকভাবেন শত্রুঘ্নো ভরতং তথা ।
রামশ্চাপধরো নিত্যং তূণীবাণান্বিতঃ প্রভুঃ ॥ ৬২॥

অশ্বারূঢো বনং যাতি মৃগযাযৈ সলক্ষ্মণঃ ।
হত্বা দুষ্টমৃগান্ সর্বান্ পিত্রে সর্বং ন্যবেদযত্ ॥ ৬৩॥

প্রাতরুত্থায সুস্নাতঃ পিতরাবভিবাদ্য চ ।
পৌরকার্যাণি সর্বাণি করোতি বিনযান্বিতঃ ॥ ৬৪॥

বন্ধুভিঃ সহিতো নিত্যং ভুক্ত্বা মুনিভিরন্বহম্ ।
ধর্মশাস্ত্ররহস্যানি শৃণোতি ব্যাকরোতি চ ॥ ৬৫॥

এবং পরাত্মা মনুজাবতারো মনুষ্যলোকাননুসৃত্য সর্বম্ ।
চক্রেঽবিকারী পরিণামহীনো বিচার্যমাণে ন করোতি কিঞ্চিত্ ॥ ৬৬॥

ইতি শ্রীমদধ্যাত্মরামাযণে উমামহেশ্বরসম্বাদে
বালকাণ্ডে তৃতীযঃ সর্গঃ ॥ ৩॥

॥ অধ্যাত্ম রামাযণম্ ॥

॥ বালকাণ্ডম্ ॥

॥ চতুর্থঃ সর্গঃ ॥

শ্রীমহাদেব উবাচ

কদাচিৎকৌশিকোঽভ্যাগাদযোধ্যাং জ্বলনপ্রভঃ ।

দ্রষ্টুং রামং পরাত্মানং জাতং জ্ঞাত্বা স্বমাযযা ॥ ১॥

দৃষ্ট্বা দশরথো রাজা প্রত্যুত্থাযাচিরেণ তু ।

বসিষ্ঠেন সমাগম্য পূজযিত্বা যথাবিধি ॥ ২॥

অভিবাদ্য মুনিং রাজা প্রাঞ্জলির্ভক্তিনম্রধীঃ ।

কৃতার্থোঽস্মি মুনীন্দ্রাহং ত্বদাগমনকারণাত্ ॥ ৩॥

ত্বদ্বিধা যদ্গৃহম্ যান্তি তত্রৈবাযান্তি সম্পদঃ ।

যদর্থমাগতোঽসি ত্বং ব্রূহি সত্যং করোমি তত্ ॥ ৪॥

বিশ্বামিত্রোঽপি তং প্রীতঃ প্রত্যুবাচ মহীপতিম্ ।

অহং পর্বণি সম্প্রাপ্তে দৃষ্ট্বা যষ্টুং সুরান্ পিতৃন্ ॥ ৫॥

যদারভে তদা দৈত্যা বিঘ্নং কুর্বন্তি নিত্যশঃ ।

মারীচশ্চ সুবাহুশ্চাপরে চানুচরাস্তযোঃ ॥ ৬॥

অতস্তযোর্বধার্থায জ্যেষ্ঠং রামং প্রযচ্ছ মে ।

লক্ষ্মণেন সহ ভ্রাত্রা তব শ্রেয়ো ভবিষ্যতি ॥ ৭॥

বসিষ্ঠেন সহামন্ত্র্য দীযতাং যদি রোচতে ।

পপ্রচ্ছ গুরুমেকান্তে রাজা চিন্তাপরাযণঃ ॥ ৮॥

কিং করোমি গুরো রামং ত্যক্তুং নোৎসহতে মনঃ ।

বহুবর্ষসহস্রান্তে কষ্টেনোৎপাদিতাঃ সুতাঃ ॥ ৯॥

চত্বারোঽমরতুল্যাস্তে তেষাং রামোঽতিবল্লভঃ ।

রামস্ত্বিতো গচ্ছতি চেন্ন জীবামি কথঞ্চন ॥ ১০॥

প্রত্যাখ্যাতো যদি মুনিঃ শাপং দাস্যত্যসম্শযঃ ।

কথং শ্রেয়ো ভবেন্মহ্যমসত্যং চাপি ন স্পৃশেত্ ॥ ১১॥

বসিষ্ঠ উবাচ

শৃণু রাজন্ দেবগুহ্যং গোপনীযং প্রযত্নতঃ ।

রামো ন মানুষো জাতঃ পরমাত্মা সনাতনঃ ॥ ১২॥

ভূমের্ভারাবতারায ব্রহ্মণা প্রার্থিতঃ পুরা ।

স এব জাতো ভবনে কৌসল্যাযাং তবানঘ ॥ ১৩॥

ত্বং তু প্রজাপতিঃ পূর্বং কশ্যপো ব্রহ্মণঃ সুতঃ ।

কৌসল্যা চাদিতির্দেবমাতা পূর্বং যশস্বিনী ॥ ১৪॥

ভবন্তৌ তপ উগ্রং বৈ তেপাথে বহুবৎসরম্ ।
অগ্রাম্যবিষযৌ বিষ্ণুপূজাধ্যানৈকতৎপরৌ ।
তদা প্রসন্নো ভগবান্ বরদো ভক্তবৎসলঃ ॥ ১৫॥

বৃণীষ্ব বরমিত্যুক্তে ত্বং মে পুত্রো ভবামল ।
ইতি ত্বযা যাচিতোঽসৌ ভগবান্ ভূতভাবনঃ ॥ ১৬॥

তথেত্যুক্ত্বাদ্য পুত্রস্তে জাতো রামঃ স এব হি ।
শেষস্তু লক্ষ্মণো রাজন্ রামমেবান্বপদ্যত ॥ ১৭॥

জাতৌ ভরতশত্রুঘ্নৌ শঙ্খচক্রে গদাভৃতঃ ।
যোগমাযাপি সীতেতি জাতা জনকনন্দিনী ॥ ১৮॥

বিশ্বামিত্রোঽপি রামায তাং যোজযিতুমাগতঃ ।
এতদ্গুহ্যতমং রাজন্ন বক্তব্যং কদাচন ॥ ১৯॥

অতঃ প্রীতেন মনসা পূজযিত্বাথ কৌশিকম্ ।
প্রেষযস্ব রমানাথং রাঘবং সহলক্ষ্মণম্ ॥ ২০॥

বসিষ্ঠেনৈবমুক্তস্তু রাজা দশরথস্তদা ।

কৃতকৃত্যমিবাত্মানং মেনে প্রমুদিতান্তরঃ ॥ ২১॥

আহূয রামরামেতি লক্ষ্মণেতি চ সাদরম্ ।
আলিঙ্গ্য মূর্ধ্ন্যবঘ্রায কৌশিকায সমর্পযত্ ॥ ২২॥

ততোঽতিহৃষ্টো ভগবান্ বিশ্বামিত্রঃ প্রতাপবান্ ।
আশীর্ভিরভিনন্দ্যাথ আগতৌ রামলক্ষ্মণৌ ।
গৃহীত্বা চাপতূণীরবাণখড্গধরৌ যযৌ ॥ ২৩॥

কিঞ্চিদ্দেশমতিক্রম্য রামমাহূয ভক্তিতঃ ।
দদৌ বলাং চাতিবলাং বিদ্যে দ্বে দেবনির্মিতে ॥ ২৪॥

যযোর্গ্রহণমাত্রেণ ক্ষুৎক্ষামাদি ন জাযতে ॥ ২৫॥

তত উত্তীর্য গঙ্গাং তে তাটকাবনমাগমন্ ।
বিশ্বামিত্রস্তদা প্রাহ রামং সত্যপরাক্রমম্ ॥ ২৬॥

অত্রাস্তি তাটকা নাম রাক্ষসী কামরূপিণী ।
বাধতে লোকমখিলং জহি তামবিচারযন্ ॥ ২৭॥

তথেতি ধনুরাদায সগুণং রঘুনন্দনঃ ।
টঙ্কারমকরোত্তেন শব্দেনাপূরযদ্বনম্ ॥ ২৮॥

তচ্ছ্রুত্বাসহমানা সা তাটকা ঘোররূপিণী ।

ক্রোধসংমূর্ছিতা রামমভিদুদ্রাব মেঘবত্ ॥ ২৯॥

তামেকেন শরেণাশু তাডযামাস বক্ষসি ।

পপাত বিপিনে ঘোরা বমন্তী রুধিরং বহু ॥ ৩০॥

ততোঽতিসুন্দরী যক্ষী সর্বাভরণভূষিতা ।

শাপাৎপিশাচতাং প্রাপ্তা মুক্তা রামপ্রসাদতঃ ॥ ৩১॥

নত্বা রামং পরিক্রম্য গতা রামাজ্ঞযা দিবম্ ॥ ৩২॥

ততোঽতিহৃষ্টঃ পরিরভ্য রামং

মূর্ধন্যবঘ্রায বিচিন্ত্য কিঞ্চিত্ ।

সর্বাস্ত্রজালং সরহস্যমন্ত্রং

প্রীত্যাভিরামায দদৌ মুনীন্দ্রঃ ॥ ৩৩॥

ইতি শ্রীমদধ্যাত্মরামাযণে উমামহেশ্বরসন্বাদে

বালকাণ্ডে চতুর্থঃ সর্গঃ ॥ ৪॥

॥ অধ্যাত্ম রামাযণম্ ॥

॥ বালকাণ্ডম্ ॥

॥ পঞ্চমঃ সর্গঃ ॥

শ্রীমহাদেব উবাচ

তত্র কামাশ্রমে রম্যে কাননে মুনিসঙ্কুলে ।

উষিত্বা রজনীমেকাং প্রভাতে প্রস্থিতাঃ শনৈঃ ॥ ১॥

সিদ্ধাশ্রমং গতাঃ সর্বে সিদ্ধচারণসেবিতম্ ।

বিশ্বামিত্রেণ সন্দিষ্টা মুনযস্তন্নিবাসিনঃ ॥ ২॥

পূজাং চ মহতীং চক্রু রামলক্ষ্মণযোর্দ্রুতম্ ।

শ্রীরামঃ কৌশিকং প্রাহ মুনে দীক্ষাং প্রবিশ্যতাম্ ॥ ৩॥

দর্শযস্ব মহাভাগ কুতস্তৌ রাক্ষসাধমৌ ।

তথেত্যুক্ত্বা মুনির্যষ্টুমারেভে মুনিভিঃ সহ ॥ ৪॥

মধ্যাহ্নে দদৃশাতে তৌ রাক্ষসৌ কামরূপিণৌ ।

মারীচশ্চ সুবাহুশ্চ বর্ষন্তৌ রুধিরাস্থিনী ॥ ৫॥

রামোঽপি ধনুরাদায দ্বৌ বাণৌ সন্দধে সুধীঃ ।

আকর্ণান্তং সমাকৃষ্য বিসসর্জ তযোঃ পৃথক্ ॥ ৬॥

তযোরেকস্তু মারীচং ভ্রামযঞ্শতযোজনম্ ।

পাতযামাস জলধৌ তদদ্ভুতমিবাভবত্ ॥ ৭॥

দ্বিতীযোঽগ্নিমযো বাণঃ সুবাহুমজযৎক্ষণাত্ ।
অপরে লক্ষমণেনাশু হতাস্তদনুযাযিনঃ ॥ ৮॥

পুষ্পৌঘৈরাকিরন্ দেবা রাঘবং সহলক্ষ্মণম্ ।
দেবদুন্দুভযো নেদুস্তুষ্টুবুঃ সিদ্ধচারণাঃ ॥ ৯॥

বিশ্বামিত্রস্তু সংপূজ্য পূজার্হং রঘুনন্দনম্ ।
অঙ্কে নিবেশ্য চালিঙ্গ্য ভক্ত্যা বাষ্পাকুলেক্ষণঃ ॥ ১০॥

ভোজযিত্বা সহ ভ্রাত্রা রামং পক্বফলাদিভিঃ ।
পুরাণবাক্যৈর্মধুরৈর্নিনায দিবসত্রযম্ ॥ ১১॥

চতুর্থেঽহনি সংপ্রাপ্তে কৌশিকো রামমব্রবীত্ ।
রাম রাম মহাযজ্ঞং দ্রষ্টুং গচ্ছামহে বযম্ ॥ ১২॥

বিদেহরাজনগরে জনকস্য মহাত্মনঃ ।
তত্র মাহেশ্বরং চাপমস্তি ন্যস্তং পিনাকিনা ॥ ১৩॥

দ্রক্ষ্যসি ত্বং মহাসত্ত্বং পূজ্যসে জনকেন চ ।
ইত্যুক্ত্বা মুনিভিস্তাভ্যাং যযৌ গঙ্গাসমীপগম্ ॥ ১৪॥

গৌতমস্যাশ্রমং পুণ্যং যত্রাহল্যাস্থিতা তপঃ ।

দিব্যপুষ্পফলোপেতপাদপৈঃ পরিবেষ্টিতম্ ॥ ১৫॥

মৃগপক্ষিগণৈর্হীনং নানাজন্তুবিবর্জিতং ।
দৃষ্ট্বোবাচ মুনিং শ্রীমান্ রামো রাজীবলোচনঃ ॥ ১৬॥

কস্যৈতদাশ্রমপদং ভাতি ভাস্বচ্ছুভং মহত্ ।
পত্রপুষ্পফলৈর্যুক্তং জন্তুভিঃ পরিবর্জিতম্ ॥ ১৭॥

আহ্লাদযতি মে চেতো ভগবন্ ব্রূহি তত্ত্বতঃ ॥ ১৮॥

বিশ্বামিত্র উবাচ
শৃণু রাম পুরা বৃত্তং গৌতমো লোকবিশ্রুতঃ ।
সর্বধর্মভৃতাং শ্রেষ্ঠস্তপসারাধযন্ হরিম্ ॥ ১৯॥

তস্মৈ ব্রহ্মা দদৌ কন্যামহল্যাং লোকসুন্দরীম্ ।
ব্রহ্মচর্যেণ সন্তুষ্টঃ শুশ্রূষণপরাযণাম্ ॥ ২০॥

তযা সার্ধমিহাবাৎসীদ্গৌতমস্তপতাং বরঃ ।
শক্রস্তু তাং ধর্ষযিতুমন্তরং প্রেপ্সুরন্বহং ॥ ২১॥

কদাচিন্মুনিবেষেণ গৌতমে নির্গতে গৃহাত্ ।
ধর্ষযিত্বাথ নিরগাত্ত্বরিতং মুনিরপ্যগাত্ ॥ ২২॥

দৃষ্ট্বা যান্তং স্বরূপেণ মুনিঃ পরমকোপনঃ ।
পপ্রচ্ছ কস্ত্বং দুষ্টাত্মন্ মম রূপধরোঽধমঃ ॥ ২৩॥

সত্যং ব্রূহি ন চেদ্ভস্ম করিষ্যামি ন সন্শযঃ ।
সোঽব্রবীদ্দেবরাজোঽহং পাহি মাং কামকিঙ্করম্ ॥ ২৪॥

কৃতং জুগুপ্সিতং কর্ম মযা কুৎিসতচেতসা ।
গৌতমঃ ক্রোধতাম্রাক্ষঃ শশাপ দিবিজাধিপম্ ॥ ২৫॥

যোনিলম্পট দুষ্টাত্মন্ সহস্রভগবান্ ভব ।
শপ্ত্বা তং দেবরাজানং প্রবিশ্য স্বাশ্রমং দ্রুতম্ ॥ ২৬॥

দৃষ্ট্বাহল্যাং বেপমানাং প্রাঞ্জলিং গৌতমোঽব্রবীত্ ।
দুষ্টে ত্বং তিষ্ঠ দুর্বৃত্তে শিলাযামাশ্রমে মম ॥ ২৭॥

নিরাহারা দিবারাত্রং তপঃ পরমমাস্থিতা ।
আতপানিলবর্ষাদিসহিষ্ণুঃ পরমেশ্বরম্ ॥ ২৮॥

ধ্যাযন্তী রামমেকাগ্রমনসা হৃদি সন্স্থিতম্ ।
নানাজন্তুবিহীনোঽযমাশ্রমো মে ভবিষ্যতি ॥ ২৯॥

এবং বর্ষসহস্রেষু হ্যনেকেষু গতেষু চ ।

রামো দাশরথিঃ শ্রীমানাগমিষ্যতি সানুজঃ ॥ ৩০॥

যদা ত্বদাশ্রযশিলাং পাদাভ্যামাক্রমিষ্যতি ।
তদৈব ধূতপাপা ত্বং রামং সংপূজ্য ভক্তিতঃ ॥ ৩১॥

পরিক্রম্য নমস্কৃত্য স্তুত্বা শাপাদ্বিমোক্ষ্যসে ।
পূর্ববন্মম শুশ্রূষাং করিষ্যসি যথাসুখম্ ॥ ৩২॥

ইত্যুক্ত্বা গৌতমঃ প্রাগাদ্ধিমবন্তং নগোত্তমম্ ।
তদাদ্যহল্যা ভূতানামদৃশ্যা স্বাশ্রামে শুভে ॥ ৩৩॥

তব পাদরজঃস্পর্শং কাঙ্ক্ষতে পবনাশনা ।
আস্তেঽদ্যাপি রঘুশ্রেষ্ঠ তপো দুষ্করমাস্থিতা ॥ ৩৪॥

পাবযস্ব মুনের্ভার্যামহল্যাং ব্রহ্মণঃ সুতাম্ ।
ইত্যুক্ত্বা রাঘবং হস্তে গৃহীত্বা মুনিপুঙ্গবঃ ॥ ৩৫॥

দর্শযামাস চাহল্যামুগ্রেণ তপসা স্থিতাম্ ।
রামঃ শিলাং পদা স্পৃষ্ট্বা তাং চাপশ্যত্তপোধনাম্ ॥ ৩৬॥

ননাম রাঘবোঽহল্যাং রামোঽহমিতি চাব্রবীত্ ।
ততো দৃষ্ট্বা রঘুশ্রেষ্ঠং পীতকৌশেযবাসসম্ ॥ ৩৭॥

চতুর্ভুজং শঙ্খচক্রগদাপঙ্কজধারিণম্ ।

ধনুর্বাণধরং রামং লক্ষ্মণেন সমন্বিতম্ ॥ ৩৮॥

স্মিতবক্ত্রং পদ্মনেত্রং শ্রীবৎসাঙ্কিতবক্ষসম্ ।

নীলমাণিক্যসঙ্কাশং দ্যোতযন্তং দিশো দশ ॥ ৩৯॥

দৃষ্ট্বা রামং রমানাথং হর্ষবিস্ফারিতেক্ষণা ।

গৌতমস্য বচঃ স্মৃত্বা জ্ঞাত্বা নারাযণং বরম্ ॥ ৪০॥

সংপূজ্য বিধিবদ্রামমর্ঘ্যাদিভিরনিন্দিতা ।

হর্ষাশ্রুজলনেত্রান্তা দণ্ডবৎপ্রণিপত্য সা ॥ ৪১॥

উত্থায চ পুনর্দৃষ্ট্বা রামং রাজীবলোচনম্ ।

পুলকাঙ্কিতসর্বাঙ্গা গিরা গদ্গদযৈডত ॥ ৪২॥

অহল্যোবাচ

অহো কৃতার্থাস্মি জগন্নিবাস তে

পাদাব্জসন্লগ্নরজঃকণাদহম্ ।

স্পৃশামি যৎপদ্মজশন্করাদিভির্বিমৃগ্যতে

রন্ধিতমানসৈঃ সদা ॥ ৪৩॥

অহো বিচিত্রং তব রাম চেষ্টিতং

মনুষ্যভাবেন বিমোহিতং জগত্ ।
চলস্যজস্রং চরণাদিবর্জিতঃ
সম্পূর্ণ আনন্দময়োঽতিমাযিকঃ ॥ ৪৪॥

যৎপাদপঙ্কজপরাগপবিত্রগাত্রা
ভাগীরথী ভববিরিঞ্চিমুখান্ পুনাতি ।
সাক্ষাৎস এব মম দৃগ্বিষযো যদাস্তে
কিং বর্ণ্যতে মম পুরাকৃতভাগধেযম্ ॥ ৪৫॥

মর্ত্যাবতারে মনুজাকৃতিং হরিং
রামাভিধেযং রমণীযদেহিনম্ ।
ধনুর্ধরং পদ্মবিশাললোচনং
ভজামি নিত্যং ন পরান্ ভজিষ্যে ॥ ৪৬॥

যৎপাদপঙ্কজরজঃ শ্রুতিভির্বিমৃগ্যং
যন্নাভিপঙ্কজভবঃ কমলাসনশ্চ ।
যন্নামসাররসিকো ভগবান্ পুরারিস্তং
রামচন্দ্রমনিশং হৃদি ভাবযামি ॥ ৪৭॥

যস্যাবতারচরিতানি বিরিঞ্চিলোকে
গাযন্তি নারদমুখা ভবপদ্মজাদ্যাঃ ।
আনন্দজাশ্রুপরিষিক্তকুচাগ্রসীমা

বাগীশ্বরী চ তমহং শরণং প্রপদ্যে ॥ ৪৮॥

সোঽযং পরাত্মা পুরুষঃ পুরাণ

একঃ স্বযঞ্জ্যোতিরনন্ত আদ্যঃ।

মাযাতনুং লোকবিমোহনীযাং

ধত্তে পরানুগ্রহ এষ রামঃ ॥ ৪৯॥

অযং হি বিশ্বোদ্ভবসন্যমানামেকঃ

স্বমাযাগুণবিম্বিতো যঃ।

বিরিঞ্চিবিষ্ণ্বীশ্বরনামভেদান্

ধত্তে স্বতন্ত্রঃ পরিপূর্ণ আত্মা ॥ ৫০॥

নমোঽস্তু তে রাম তবাঙ্ঘ্রিপঙ্কজং

শ্রিযা ধৃতং বক্ষসি লালিতং প্রিযাত্।

আক্রান্তমেকেন জগত্রযং পুরা

ধ্যেযং মুনীন্দ্রৈরভিমানবর্জিতৈঃ ॥ ৫১॥

জগতামাদিভূতস্ত্বং জগত্ত্বং জগদাশ্রযঃ।

সর্বভূতেষ্বসন্যুক্ত একো ভাতি ভবান্ পরঃ ॥ ৫২॥

ওংকারবাচ্যস্ত্বং রাম বাচামবিষযঃ পুমান্।

বাচ্যবাচকভেদেন ভবানেব জগন্মযঃ ॥ ৫৩॥

কার্যকারণকর্তৃত্বফলসাধনভেদতঃ ।

একো বিভাসি রাম ত্বং মাযযা বহুরূপযা ॥ ৫৪॥

ত্বন্মাযামোহিতধিযস্ত্বাং ন জানন্তি তত্ত্বতঃ ।

মানুষং ত্বাভিমন্যন্তে মাযিনং পরমেশ্বরম্ ॥ ৫৫॥

আকাশবত্ত্বং সর্বত্র বহিরন্তর্গতোঽমলঃ ।

অসঙ্গো হ্যচলো নিত্যঃ শুদ্ধো বুদ্ধঃ সদব্যযঃ ॥ ৫৬॥

যোষিন্মূঢাহমজ্ঞা তে তত্ত্বং জানে কথং বিভো ।

তস্মাত্তে শতশো রাম নমস্কুর্যামনন্যধীঃ ॥ ৫৭॥

দেব মে যত্র কুত্রাপি স্থিতাযা অপি সর্বদা ।

ত্বৎপাদকমলে সক্তা ভক্তিরেব সদাস্তু মে ॥ ৫৮॥

নমস্তে পুরুষাধ্যক্ষ নমস্তে ভক্তবৎসল ।

নমস্তেঽস্তু হৃষীকেশ নারাযণ নমোঽস্তুতে ॥ ৫৯॥

ভবভযহরমেকং ভানুকোটিপ্রকাশং

করধৃতশরচাপং কালমেঘাবভাসম্ ।

কনকরুচিরবস্ত্রং রত্নবৎকুণ্ডলাঢ্যং

কমলবিশদনেত্রং সানুজং রামমীডে ॥ ৬০॥

স্তুত্বৈবং পুরুষং সাক্ষাদ্রাঘবং পুরতঃ স্থিতম্ ।

পরিক্রম্য প্রণম্যাশু সাঽনুজ্ঞাতা যযৌ পতিম্ ॥ ৬১॥

অহল্যযা কৃতং স্তোত্রং যঃ পঠেদ্ভক্তিসন্যুতঃ ।

স মুচ্যতেঽখিলৈঃ পাপৈঃ পরং ব্রহ্মাধিগচ্ছতি ॥ ৬২॥

পুত্রাদ্যর্থে পঠেদ্ভক্ত্যা রামং হৃদি নিধায চ ।

সম্বৎসরেণ লভতে বন্ধ্যা অপি সুপুত্রকম্ ॥ ৬৩॥

সর্বান্ কামানবাপ্নোতি রামচন্দ্রপ্রসাদতঃ ॥ ৬৪॥

ব্রহ্মঘ্নো গুরুতল্পগোঽপি পুরুষঃ স্তেযী সুরাপোঽপি বা

মাতৃভ্রাতৃবিহিংসকোঽপি সততং ভোগৈকবদ্ধাতুরঃ ।

নিত্যং স্তোত্রমিদং জপন্ রঘুপতিং ভক্ত্যা হৃদিস্থং স্মরন্

ধ্যাযন্মুক্তিমুপৈতি কিং পুনরসৌ স্বাচারযুক্তো নরঃ ॥ ৬৫॥

ইতি শ্রীমদধ্যাত্মরামাযণে উমামহেশ্বরসম্বাদে বালকাণ্ডে

অহল্যোদ্ধরণং নাম পঞ্চমঃ সর্গঃ ॥ ৫॥

॥ বালকাণ্ডম্ ॥

॥ ষষ্ঠঃ সর্গঃ ॥

বিশ্বামিত্রোঽথ তং প্রাহ রাঘবং সহলক্ষ্মণম্ ।

গচ্ছামো বৎস মিথিলাং জনকেনাভিপালিতাম্ ॥ ১॥

দৃষ্ট্বা ক্রতুবরং পশ্চাদযোধ্যাং গন্তুমর্হসি ।
ইত্যুক্ত্বা প্রযযৌ গঙ্গামুত্তর্তুং সহরাঘবঃ ।
তস্মিন্ কালে নাবিকেন নিষিদ্ধো রঘুনন্দনঃ ॥ ২॥

নাবিক উবাচ
ক্ষালযামি তব পাদপঙ্কজং
নাথ দারুদৃষদোঃ কিমন্তরম্ ।
মানুষীকরণচূর্ণমস্তি তে
পাদযোরিতি কথা প্রথীযসী ॥ ৩॥

পাদাম্বুজং তে বিমলং হি কৃত্বা
পশ্চাৎপরং তীরমহং নযামি ।
নো চেত্তরী সদ্যুবতী মলেন
স্যাচ্চেদ্বিভো বিদ্ধি কুটুম্বহানিঃ ॥ ৪॥

ইত্যুক্ত্বা ক্ষালিতৌ পাদৌ পরং তীরং ততো গতাঃ ।
কৌশিকো রঘুনাথেন সহিতো মিথিলাং যযৌ ॥ ৫॥

বিদেহস্য পুরং প্রাতরৃষিবাটং সমাবিশত্ ।
প্রাপ্তং কৌশিকমাকর্ণ্য জনকোঽতিমুদান্বিতঃ ॥ ৬॥

পূজাদ্রব্যাণি সংগৃহ্য সোপাধ্যায়ঃ সমাযযৌ ।
দণ্ডবৎপ্রণিপত্যাথ পূজযামাস কৌশিকম্ ॥ ৭॥

পপ্রচ্ছ রাঘবৌ দৃষ্ট্বা সর্বলক্ষণসন্যুতৌ ।
দ্যোতযন্তৌ দিশঃ সর্বাশ্চন্দ্রসূর্যাবিবাপরৌ ॥ ৮॥

কস্যৈতৌ নরশার্দূলৌ পুত্রৌ দেবসুতোপমৌ ।
মনঃপ্রীতিকরৌ মেঽদ্য নরনারাযণাবিব ॥ ৯॥

প্রত্যুবাচ মুনিঃ প্রীতো হর্ষযন্ জনকং তদা ।
পুত্রৌ দশরথস্যৈতৌ ভ্রাতরৌ রামলক্ষ্মণৌ ॥ ১০॥

মখসন্রক্ষণার্থায মযানীতৌ পিতুঃ পুরাত্ ।
আগচ্ছন্ রাঘবো মার্গে তাটকাং বিশ্বঘাতিনীম্ ॥ ১১॥

শরেণৈকেন হতবান্নোদিতো মেঽতিবিক্রমঃ ।
ততো মমাশ্রমং গত্বা মম যজ্ঞবিহিংসকান্ ॥ ১২॥

সুবাহুপ্রমুখান্ হত্বা মারীচং সাগরেঽক্ষিপত্ ।
ততো গঙ্গাতটে পুণ্যে গৌতমস্যাশ্রমং শুভম্ ॥ ১৩॥

গত্বা তত্র শিলারূপা গৌতমস্য বধূঃ স্থিতা ।

পাদপঙ্কজসন্স্পর্শাৎকৃতা মানুষরূপিণী ॥ ১৪॥

দৃষ্ট্বাহল্যাং নমস্কৃত্য তযা সম্যক্প্রপূজিতঃ ।
ইদানীং দ্রষ্টুকামস্তে গৃহে মাহেশ্বরং ধনুঃ ॥ ১৫॥

পূজিতং রাজভিঃ সর্বৈর্দৃষ্টমিত্যনুশুশ্রুবে ।
অতো দর্শয রাজেন্দ্র শৈবং চাপমনুত্তমম্ ।
দৃষ্ট্বাযোধ্যাং জিগমিষুঃ পিতরং দ্রষ্টুমিচ্ছতি ॥ ১৬॥

ইত্যুক্তো মুনিনা রাজা পূজার্হাবিতি পূজযা ।
পূজযামাস ধর্মজ্ঞো বিধিদৃষ্টেন কর্মণা ।
ততঃ সম্প্রেষযামাস মন্ত্রিণং বুদ্ধিমত্তরম্ ॥ ১৭॥

জনক উবাচ
শীঘ্রমানয বিশ্বেশচাপং রামায দর্শয ॥ ১৮॥

ততো গতে মন্ত্রিবরে রাজা কৌশিকমব্রবীত্ ।
যদি রামো ধনুর্ধৃত্বা কোট্যামারোপযেদ্গুণম্ ॥ ১৯॥

তদা মযাত্মজা সীতা দীযতে রাঘবায হি ।
তথেতি কৌশিকোঽপ্যাহ রামং সন্বীক্ষ্য সস্মিতম্ ॥ ২০॥

শীঘ্রং দর্শয চাপাগ্র্যং রামাযামিততেজসে ।
এবং ব্রুবতি মৌনীশে আগতাশ্চাপবাহকাঃ ॥ ২১॥

চাপং গৃহীত্বা বলিনঃ পঞ্চসাহস্রসঙ্খ্যকাঃ ।
ঘণ্টাশতসমাযুক্তং মণিবজ্রাদিভূষিতম্ ॥ ২২॥

দর্শযামাস রামায মন্ত্রী মন্ত্রযতাং বরঃ ।
দৃষ্ট্বা রামঃ প্রহৃষ্টাত্মা বদ্ধ্বা পরিকরং দৃঢম্ ॥ ২৩॥

গৃহীত্বা বামহস্তেন লীলযা তোলযন্ ধনুঃ ।
আরোপযামাস গুণং পশ্যৎস্বখিলরাজসু ॥ ২৪॥

ঈষদাকর্ষযামাস পাণিনা দক্ষিণেন সঃ ।
বভঞ্জাখিলহৃৎসারো দিশঃ শব্দেন পূরযন্ ॥ ২৫॥

দিশশ্চ বিদিশশ্চৈব স্বর্গং মর্ত্যং রসাতলম্ ।
তদদ্ভুতমভূত্তত্র দেবানাং দিবি পশ্যতাম্ ॥ ২৬॥

আচ্ছাদযন্তঃ কুসুমৈর্দেবাঃ স্তুতিভিরীডিরে ।
দেবদুন্দুভযো নেদুর্ননৃতুশ্চাপ্সরোগণাঃ ॥ ২৭॥

দ্বিধা ভগ্নং ধনুর্দৃষ্ট্বা রাজালিঙ্গ্য রঘূদ্বহম্ ।

বিস্ময়ং লেভিরে সীতামাতরোঽন্তঃপুরাজিরে ॥ ২৮॥

সীতা স্বর্ণময়ীং মালাং গৃহীত্বা দক্ষিণে করে ।
স্মিতবক্ত্রা স্বর্ণবর্ণা সর্বাভরণভূষিতা ॥ ২৯॥

মুক্তাহারৈঃ কর্ণপত্রৈঃ ক্বণচ্চরণনূপুরা ।
দুকূলপরিসম্বীতা বস্ত্রান্তর্ব্যঞ্জিতস্তনী ॥ ৩০॥

রামস্যোপরি নিক্ষিপ্য স্ময়মানা মুদং যযৌ ।
ততো মুমুদিরে সর্বে রাজদারাঃ স্বলঙ্কৃতম্ ॥ ৩১॥

গবাক্ষজালরন্ধ্রেভ্যো দৃষ্ট্বা লোকবিমোহনম্ ।
ততোঽব্রবীন্মুনিং রাজা সর্বশাস্ত্রবিশারদঃ ॥ ৩২॥

ভো কৌশিক মুনিশ্রেষ্ঠ পত্রং প্রেষয় সত্বরম্ ।
রাজা দশরথঃ শীঘ্রমাগচ্ছতু সপুত্রকঃ ॥ ৩৩।

বিবাহার্থং কুমারাণাং সদারঃ সহমন্ত্রিভিঃ ।
তথেতি প্রেষয়ামাস দূতাস্ত্বরিতবিক্রমান্ ॥ ৩৪॥

তে গত্বা রাজশার্দূলং রামশ্রেয়ো ন্যবেদয়ন্ ।
শ্রুত্বা রামকৃতং রাজা হর্ষেণ মহতাপ্লুতঃ ॥ ৩৫॥

মিথিলাগমনার্থায ত্বরযামাস মন্ত্রিভিঃ ।
গচ্ছন্তু মিথিলাং সর্বে গজাশ্বরথপত্তযঃ ॥ ৩৬॥

রথমানয মে শীঘ্রং গচ্ছাম্যদ্যৈব মা চিরম্ ।
বসিষ্ঠস্ত্বগ্রতো যাতু সদারঃ সহিতোঽগ্নিভিঃ ॥ ৩৭॥

রামমাতৄঃ সমাদায মুনির্মে ভগবান্ গুরুঃ ।
এবং প্রস্থাপ্য সকলং রাজর্ষির্বিপুলং রথম্ ॥ ৩৮॥

মহত্যা সেনযা সার্ধমারুহ্য ত্বরিতো যযৌ ।
আগতং রাঘবং শ্রুত্বা রাজা হর্ষসমাকুলঃ ॥ ৩৯॥

প্রত্যুজ্জগাম জনকঃ শতানন্দপুরোধসা ।
যথোক্তপূজযা পূজ্যং পূজযামাস সৎকৃতম্ ॥ ৪০॥

রামস্তু লক্ষ্মণেনাশু ববন্দে চরণৌ পিতুঃ ।
ততো হৃষ্টো দশরথো রামং বচনমব্রবীত্ ॥ ৪১॥

দিষ্ট্যা পশ্যামি তে রাম মুখং ফুল্লাম্বুজোপমম্ ।
মুনেরনুগ্রহাৎসর্বং সম্পন্নং মম শোভনম্ ॥ ৪২॥

ইত্যুক্ত্বাঘ্রায মূর্ধানমালিঙ্গ্য চ পুনঃ পুনঃ ।

হর্ষেণ মহতাবিষ্টো ব্রহ্মানন্দং গতো যথা ॥ ৪৩॥

ততো জনকরাজেন মন্দিরে সন্নিবেশিতঃ ।
শোভনে সর্বভোগাঢ্যে সদারঃ সসুতঃ সুখী ॥ ৪৪॥

ততঃ শুভে দিনে লগ্নে সুমুহূর্তে রঘূত্তমম্ ।
আনযামাস ধর্মজ্ঞো রামং সভ্রাতৃকং তদা ॥ ৪৫॥

রত্নস্তম্ভসুবিস্তারে সুবিতানে সুতোরণে ।
মণ্ডপে সর্বশোভাঢ্যে মুক্তাপুষ্পফলান্বিতে ॥ ৪৬॥

বেদবিদ্ভিঃ সুসম্বাধে ব্রাহ্মণৈঃ স্বর্ণভূষিতৈঃ ।
সুবাসিনীভিঃ পরিতো নিষ্ককণ্ঠীভিরাবৃতে ॥ ৪৭॥

ভেরীদুন্দুভিনির্ঘোষৈর্গীতনৃত্যৈঃ সমাকুলে ।
দিব্যরত্নাঞ্চিতে স্বর্ণপীঠে রামং ন্যবেশযত্ ॥ ৪৮॥

বসিষ্ঠং কৌশিকং চৈব শতানন্দঃ পুরোহিতঃ ।
যথাক্রমং পূজযিত্বা রামস্যোভযপার্শ্বযোঃ ॥ ৪৯॥

স্থাপযিত্বা স তত্রাগ্নিং জ্বালযিত্বা যথাবিধি ।
সীতামানীয শোভাঢ্যাং নানারত্নবিভূষিতাম্ ॥ ৫০॥

সভার্যো জনকঃ প্রাযাদ্রামং রাজীবলোচনম্ ।
পাদৌ প্রক্ষাল্য বিধিবত্তদপো মূর্ধ্ন্যধারযত্ ॥ ৫১॥

যা ধৃতা মূর্ধ্নি শর্বেণ ব্রহ্মণা মুনিভিঃ সদা ।
ততঃ সীতাং করে ধৃত্বা সাক্ষতোদকপূর্বকম্ ॥ ৫২॥

রামায প্রদদৌ প্রীত্যা পাণিগ্রহবিধানতঃ ।
সীতা কমলপত্রাক্ষী স্বর্ণমুক্তাদিভূষিতা ॥ ৫৩॥

দীযতে মে সুতা তুভ্যং প্রীতো ভব রঘূত্তম ।
ইতি প্রীতেন মনসা সীতাং রামকরেঽর্পযন্ ॥ ৫৪॥

মুমোদ জনকো লক্ষ্মীং ক্ষীরাব্ধিরিব বিষ্ণবে ।
ঊর্মিলাং চৌরসীং কন্যাং লক্ষ্মণায দদৌ মুদা ॥ ৫৫॥

তথৈব শ্রুতিকীর্তিং চ মাণ্ডবীং ভ্রাতৃকন্যকে ।
ভরতায দদাবেকাং শত্রুঘ্নাযাপরাং দদৌ ॥ ৫৬॥

চত্বারো দারসম্পন্না ভ্রাতরঃ শুভলক্ষণাঃ ।
বিরেজুঃ প্রজযা সর্বে লোকপালা ইবাপরে ॥ ৫৭॥

ততোঽব্রবীদ্বসিষ্ঠায বিশ্বামিত্রায মৈথিলঃ ।

জনকঃ স্বসুতোদন্তং নারদেনাভিভাষিতম্ ॥ ৫৮॥

যজ্ঞভূমিবিশুদ্ধ্যর্থং কর্ষতো লাঙ্গলেন মে ।
সীতামুখাৎসমুৎপন্না কন্যকা শুভলক্ষণা ॥ ৫৯॥

তামদ্রাক্ষমহং প্রীত্যা পুত্রিকাভাবভাবিতাম্ ।
অর্পিতা প্রিযভার্যাযৈ শরচ্চন্দ্রনিভাননা ॥ ৬০॥

একদা নারদোঽভ্যাগাদ্বিবিক্তে মযি সন্স্থিতে ।
রণযন্মহতীম্ বীণাং গাযন্নারাযণং বিভুম্ ॥ ৬১॥

পূজিতঃ সুখমাসীনো মামুবাচ সুখান্বিতঃ ।
শৃণুষ্ব বচনং গুহ্যং তবাভ্যুদযকারণম্ ॥ ৬২॥

পরমাত্মা হৃষীকেশো ভক্তানুগ্রহকাম্যযা ।
দেবকার্যার্থসিদ্ধ্যর্থং রাবণস্য বধায চ ॥ ৬৩॥

জাতো রাম ইতি খ্যাতো মাযামানুষবেষধৃক্ ।
আস্তে দাশরথির্ভূত্বা চতুর্ধা পরমেশ্বরঃ ॥ ৬৪॥

যোগমাযাঽপি সীতেতি জাতা বৈ তব বেশ্মনি ।
অতস্ত্বং রাঘবাযৈব দেহি সীতাং প্রযত্নতঃ ॥ ৬৫॥

নান্যেভ্যঃ পূর্বভার্যৈষা রামস্য পরমাত্মনঃ।
ইত্যুক্ত্বা প্রযযৌ দেবগতিং দেবমুনিস্তদা ॥ ৬৬॥

তদারভ্য মযা সীতা বিষ্ণোর্লক্ষ্মীর্বিভাব্যতে।
কথং মযা রাঘবায দীযতে জানকী শুভা ॥ ৬৭॥

ইতি চিন্তাসমাবিষ্টঃ কার্যমেকমচিন্তযম্।
মৎপিতামহগেহে তু ন্যাসভূতমিদং ধনুঃ ॥ ৬৮॥

ঈশ্বরেণ পুরা ক্ষিপ্তং পুরদাহাদনন্তরম্।
ধনুরেতৎপণং কার্যমিতি চিন্ত্য কৃতং তথা ॥ ৬৯॥

সীতাপাণিগ্রহার্থায সর্বেষাং মাননাশনম্।
ত্বৎপ্রসাদান্মুনিশ্রেষ্ঠ রামো রাজীবলোচনঃ ॥ ৭০॥

আগতোঽত্র ধনুর্দ্রষ্টুং ফলিতো মে মনোরথঃ।
অদ্য মে সফলং জন্ম রাম ত্বাং সহ সীতযা ॥ ৭১॥

একাসনস্থং পশ্যামি ভ্রাজমানং রবিং যথা ॥ ৭২॥

ত্বৎপাদাম্বুধরো ব্রহ্মা সৃষ্টিচক্রপ্রবর্তকঃ।
বলিস্ত্বৎপাদসলিলং ধৃত্বাভূদ্দিবিজাধিপঃ ॥ ৭৩॥

ত্বৎপাদপাংসুসংস্পর্শাদহল্যা ভর্তৃশাপতঃ ।
সদ্য এব বিনির্মুক্তা কোঽন্যস্ত্বত্তোঽধিরক্ষিতা ॥ ৭৪॥

যৎপাদপঙ্কজপরাগসুরাগযোগিবৃন্দৈর্জিতং
ভবভযং জিতকালচক্রৈঃ ।
যন্নামকীর্তনপরা জিতদুঃখশোকা
দেবাস্তমেব শরণং সততং প্রপদ্যে ॥ ৭৫॥

ইতি স্তুত্বা নৃপঃ প্রাদাদ্রাঘবায মহাত্মনে ।
দীনারাণাং কোটিশতং রথানামযুতং তদা ॥ ৭৬॥

অশ্বানাং নিযুতং প্রাদাদ্গজানাং ষট্শতং তথা ।
পত্তীনাং লক্ষমেকং তু দাসীনাং ত্রিশতং দদৌ ॥ ৭৭॥

দিব্যাম্বরাণি হারাংশ্চ মুক্তারত্নমযোজ্জ্বলান্ ।
সীতাযৈ জনকঃ প্রাদাৎপ্রীত্যা দুহিতৃবৎসলঃ ॥ ৭৮॥

বসিষ্ঠাদীন্ সুসম্পূজ্য ভরতং লক্ষ্মণং তথা ।
পূজযিত্বা যথান্যাযং তথা দশরথং নৃপম্ ॥ ৭৯॥

প্রস্থাপযামাস নৃপো রাজানং রঘুসত্তমম্ ।
সীতামালিঙ্গ্য রুদতীং মাতরঃ সাশ্রুলোচনাঃ ॥ ৮০॥

শ্বশ্রূশুশ্রূষণপরা নিত্যং রামমনুব্রতা ।

পাতিব্রত্যমুপালম্ব্য তিষ্ঠ বৎসে যথা সুখম্ ॥ ৮১॥

প্রযাণকালে রঘুনন্দনস্য ভেরীমৃদঙ্গানকতূর্যঘোষঃ ।

স্বর্বাসিভেরীঘনতূর্যশব্দৈঃ সন্মূর্চ্ছিতো ভূতভযঙ্করোঽভূত্ ॥ ৮২॥

ইতি শ্রীমদধ্যাত্মরামাযণে উমামহেশ্বরসম্বাদে

বালকাণ্ডে ষষ্ঠঃ সর্গঃ ॥ ৬॥

॥ বালকাণ্ডম্ ॥

॥ সপ্তমঃ সর্গঃ ॥

অথ গচ্ছতি শ্রীরামে মৈথিলাদ্যোজনত্রযম্ ।

নিমিত্তান্যতিঘোরাণি দদর্শ নৃপসত্তমঃ ॥ ১॥

নত্বা বসিষ্ঠং পপ্রচ্ছ কিমিদং মুনিপুঙ্গব ।

নিমিত্তানীহ দৃশ্যন্তে বিষমাণি সমন্ততঃ ॥ ২॥

বসিষ্ঠস্তমথ প্রাহ ভযমাগামি সূচ্যতে ।

পুনরপ্যভযং তেঽদ্য শীঘ্রমেব ভবিষ্যতি ॥ ৩॥

মৃগাঃ প্রদক্ষিণং যান্তি পশ্য ত্বাং শুভসূচকাঃ ।

ইত্যেবং বদতস্তস্য ববৌ ঘোরতরোঽনিলঃ ॥ ৪॥

মুষ্ণন্শ্চক্ষূন্ষি সর্বেষাং পাংসুবৃষ্টিভিরর্দযন্ ।
ততো ব্রজন্ দদর্শাগ্রে তেজোরাশিমুপস্থিতম্ ॥ ৫॥

কোটিসূর্যপ্রতীকাশং বিদ্যুৎপুঞ্জসমপ্রভম্ ।
তেজোরাশিং দদর্শাথ জামদগ্ন্যং প্রতাপবান্ ॥ ৬॥

নীলমেঘনিভং প্রান্শুং জটামণ্ডলমণ্ডিতম্ ।
ধনুঃ পরশুপাণিং চ সাক্ষাৎকালমিবান্তকম্ ॥ ৭॥

কার্তবীর্যান্তকং রামং দৃপ্তক্ষত্রিযমর্দনম্ ।
প্রাপ্তং দশরথস্যাগ্রে কালমৃত্যুমিবাপরম্ ॥ ৮॥

তং দৃষ্ট্বা ভযসন্ত্রস্তো রাজা দশরথস্তদা ।
অর্ঘ্যাদিপূজাং বিস্মৃত্য ত্রাহি ত্রাহীতি চাব্রবীত্ ॥ ৯॥

দণ্ডবৎপ্রণিপত্যাহ পুত্রপ্রাণং প্রযচ্ছ মে ।
ইতি ব্রুবন্তং রাজানমনাদৃত্য রঘূত্তমম্ ॥ ১০॥

উবাচ নিষ্ঠুরং বাক্যং ক্রোধাৎপ্রচলিতেন্দ্রিযঃ ।
ত্বং রাম ইতি নাম্না মে চরসি ক্ষত্রিযাধম ॥ ১১॥

দ্বন্দ্বযুদ্ধং প্রযচ্ছাশু যদি ত্বং ক্ষত্রিযোঽসি বৈ ।

পুরাণং জর্জরং চাপং ভঙ্ক্ত্বা ত্বং কত্থসে মুধা ॥ ১২॥

অস্মিঁস্তু বৈষ্ণবে চাপে আরোপযসি চেদ্গুণম্ ।
তদা যুদ্ধং ত্বযা সার্ধং করোমি রঘুবংশজ ॥ ১৩॥

নো চেৎসর্বান্ হনিষ্যামি ক্ষত্রিযান্তকরো হ্যহম্ ।
ইতি ব্রুবতি বৈ তস্মিংশ্চচাল বসুধা ভৃশম্ ॥ ১৪॥

অন্ধকারো বভূবাথ সর্বেষামপি চক্ষুষাম্ ।
রামো দাশরথির্বীরো বীক্ষ্য তং ভার্গবং রুষা ॥ ১৫॥

ধনুরাচ্ছিদ্য তদ্ধস্তাদারোপ্য গুণমঞ্জসা ।
তূণীরাদ্বাণমাদায সন্ধাযাকৃষ্য বীর্যবান্ ॥ ১৬॥

উবাচ ভার্গবং রামং শৃণু ব্রহ্মন্ বচো মম ।
লক্ষ্যং দর্শয বাণস্য হ্যমোঘো মম সাযকঃ ॥ ১৭॥

লোকান্ পাদযুগং বাপি বদ শীঘ্রং মমাজ্ঞযা ।
অযং লোকঃ পরো বাথ ত্বযা গন্তুং ন শক্যতে ॥ ১৮॥

এবং ত্বং হি প্রকর্তব্যং বদ শীঘ্রং মমাজ্ঞযা ।
এবং বদতি শ্রীরামে ভার্গবো বিকৃতাননঃ ॥ ১৯॥

সংস্মরন্ পূর্ববৃত্তান্তমিদং বচনমব্রবীত্ ।
রাম রাম মহাবাহো জানে ত্বাং পরমেশ্বরম্ ॥ ২০॥

পুরাণপুরুষং বিষ্ণুং জগৎসর্গলযোদ্ভবম্ ।
বাল্যেঽহং তপসা বিষ্ণুমারাধযিতুমঞ্জসা ॥ ২১॥

চক্রতীর্থং শুভং গত্বা তপসা বিষ্ণুমন্বহম্ ।
অতোষযং মহাত্মানং নারাযণমনন্যধীঃ ॥ ২২॥

ততঃ প্রসন্নো দেবেশঃ শঙ্খচক্রগদাধরঃ ।
উবাচ মাং রঘুশ্রেষ্ঠ প্রসন্নমুখপঙ্কজঃ ॥ ২৩॥

শ্রীভগবানুবাচ
উত্তিষ্ঠ তপসো ব্রহ্মন্ ফলিতং তে তপো মহত্ ।
মচ্চিদংশেন যুক্তস্ত্বং জহি হৈহযপুঙ্গবম্ ॥ ২৪॥

কার্তবীর্যং পিতৃহণং যদর্থং তপসঃ শ্রমঃ ।
ততস্ত্রিঃসপ্তকৃত্বস্ত্বং হত্বা ক্ষত্রিযমণ্ডলম্ ॥ ২৫॥

কৃৎস্নাং ভূমিং কশ্যপায দত্ত্বা শান্তিমুপাবহ ।
ত্রেতামুখে দাশরথির্ভূত্বা রামোঽহমব্যযঃ ॥ ২৬॥

উৎপৎস্যে পরযা শক্ত্যা তদা দ্রক্ষ্যসি মাং ততঃ ।
মত্তেজঃ পুনরাদাস্যে ত্যযি দত্তং মযা পুরা ॥ ২৭॥

তদা তপশ্চরল্লোঁকে তিষ্ঠ ত্বং ব্রহ্মণো দিনম্ ।
ইত্যুক্ত্বান্তর্দধে দেবস্তথা সর্বং কৃতং মযা ॥ ২৮॥

স এব বিষ্ণুস্ত্বং রাম জাতোঽসি ব্রহ্মণার্থিতঃ ।
মযি স্থিতং তু ত্বত্তেজস্ত্বযৈব পুনরাহৃতম্ ॥ ২৯॥

অদ্য মে সফলং জন্ম প্রতীতোঽসি মম প্রভো ।
ব্রহ্মাদিভিরলভ্যস্ত্বং প্রকৃতেঃ পারগো মতঃ ॥ ৩০॥

ত্যযি জন্মাদিষড্ভাবা ন সন্ত্যজ্ঞানসম্ভবাঃ ।
নির্বিকারোঽসি পূর্ণস্ত্বং গমনাদিবিবর্জিতঃ ॥ ৩১॥

যথা জলে ফেনজালং ধূমো বহ্নৌ তথা ত্বযি ।
ত্বদাধারা ত্বদ্বিষযা মাযা কার্যং সৃজত্যহো ॥ ৩২॥

যাবন্মাযাবৃতা লোকাস্তাবত্ত্বাং ন বিজানতে ।
অবিচারিতসিদ্ধৈষাঽবিদ্যা বিদ্যাবিরোধিনী ॥ ৩৩॥

অবিদ্যাকৃতদেহাদিসঙ্ঘাতে প্রতিবিম্বিতা ।

চিচ্ছক্তিজীবলোকেঽস্মিন্ জীব ইত্যভিধীযতে ॥ ৩৪॥

যাবদ্দেহমনঃপ্রাণবুদ্ধ্যাদিষ্বভিমানবান্ ।

তাবৎকর্তৃত্বভোক্তৃত্বসুখদুঃখাদিভাগ্ভবেত্ ॥ ৩৫॥

আত্মনঃসংসৃতির্নাস্তি বুদ্ধের্জ্ঞানং ন জাত্বিতি ।

অবিবেকাদ্দ্বযং যুঙ্ক্ত্বা সংসারীতি প্রবর্ততে ॥ ৩৬॥

জডস্য চিৎসমাযোগাচ্চিত্ত্বং ভূযাচ্চিতেস্তথা ।

জডসঙ্গাজ্জডত্বং হি জলাগ্ন্যোর্মেলনং যথা ॥ ৩৭॥

যাবত্ত্বৎপাদভক্তানাং সঙ্গসৌখ্যং ন বিন্দতি ।

তাবৎসংসারদুঃখৌঘান্ন নিবর্তেন্নরঃ সদা ॥ ৩৮॥

তৎসঙ্গলব্ধযা ভক্ত্যা যদা ত্বাং সমুপাসতে ।

তদা মাযা শনৈর্যাতি তানবং প্রতিপদ্যতে ॥ ৩৯॥

ততস্ত্বজ্জ্ঞানসম্পন্নঃ সদ্গুরুস্তেন লভ্যতে ।

বাক্যজ্ঞানং গুরোর্লব্ধ্বা ত্বৎপ্রসাদাদ্বিমুচ্যতে ॥ ৪০॥

তস্মাত্ত্বদ্ভক্তিহীনানাং কল্পকোটিশতৈরপি ।

ন মুক্তিশঙ্কা বিজ্ঞানশঙ্কা নৈব সুখং তথা ॥ ৪১॥

অতস্ত্বৎপাদযুগলে ভক্তির্মে জন্মজন্মনি ।

স্যাত্ত্বদ্ভক্তিমতাং সঙ্গোঽবিদ্যা যাভ্যাং বিনশ্যতি ॥ ৪২॥

লোকে ত্বদ্ভক্তিনিরতাস্ত্বদ্ধর্মামৃতবর্ষিণঃ ।

পুনন্তি লোকমখিলং কিং পুনঃ স্বকুলোদ্ভবান্ ॥ ৪৩॥

নমোঽস্তু জগতাং নাথ নমস্তে ভক্তিভাবন ।

নমঃ কারুণিকানন্ত রামচন্দ্র নমোঽস্তু তে ॥ ৪৪॥

দেব যদ্যৎকৃতং পুণ্যং মযা লোকজিগীষযা ।

তৎসর্বং তব বাণায ভূযাদ্রাম নমোঽস্তু তে ॥ ৪৫॥

ততঃ প্রসন্নো ভগবান্ শ্রীরামঃ করুণামযঃ ।

প্রসন্নোঽস্মি তব ব্রহ্মন্ যত্তে মনসি বর্ততে ॥ ৪৬॥

দাস্যে তদখিলং কামং মা কুরুষ্বাত্র সন্শযম্ ।

ততঃ প্রীতেন মনসা ভার্গবো রামমব্রবীত্ ॥ ৪৭॥

যদি মেঽনুগ্রহো রাম তবাস্তি মধুসূদন ।

ত্বদ্ভক্তসঙ্গস্ত্বৎপাদে দৃঢা ভক্তিঃ সদাস্তু মে ॥ ৪৮॥

স্তোত্রমেতৎপঠেদ্যস্তু ভক্তিহীনোঽপি সর্বদা ।

ত্বদ্ভক্তিস্তস্য বিজ্ঞানং ভূযাদন্তে স্মৃতিস্তব ॥ ৪৯॥

তথেতি রাঘবেণোক্তঃ পরিক্রম্য প্রণম্য তম্ ।
পূজিতস্তদনুজ্ঞাতো মহেন্দ্রাচলমন্বগাত্ ॥ ৫০॥

রজা দশরথো হৃষ্টো রামং মৃতমিবাগতম্ ।
আলিঙ্গ্যালিঙ্গ্য হর্ষেণ নেত্রাভ্যাং জলমুৎসৃজত্ ॥ ৫১॥

ততঃ প্রীতেন মনসা স্বস্থচিত্তঃ পুরং যযৌ ।
রামলক্ষ্মণশত্রুঘ্নভরতা দেবসংমিতাঃ ॥ ৫২॥

স্বাং স্বাং ভর্যামুপাদায রেমিরে স্বস্বমন্দিরে ।
মাতাপিতৃভ্যাং সন্হৃষ্টো রামঃ সীতাসমন্বিতঃ ।
রেমে বৈকুণ্ঠভবনে শ্রিযা সহ যথা হরিঃ ॥ ৫৩॥

যুধাজিন্নাম কৈকেযীভ্রাতা ভরতমাতুলঃ ।
ভরতং নেতুমাগচ্ছৎস্বরাজ্যং প্রীতিসন্যুতঃ ॥ ৫৪॥

প্রেষযামাস ভরতং রাজা স্নেহসমন্বিতঃ ।
শত্রুঘ্নং চাপি সংপূজ্য যুধাজিতমরিন্দমঃ ॥ ৫৫।

কৌসল্যা শুশুভে দেবী রামেণ সহ সীতযা ।

দেবমাতেব পৌলোম্যা শচ্যা শক্রেণ শোভনা ॥ ৫৬॥

সাকেতে লোকনাথপ্রথিতগুণগণো লোকসঙ্গীতকীর্তিঃ

শ্রীরামঃ সীতযাস্তেঽখিলজননিকরানন্দসন্দোহমূর্তিঃ ।

নিত্যশ্রীর্নির্বিকারো নিরবধিবিভবো নিত্যমাযানিরাসো

মাযাকার্যানুসারী মনুজ ইব সদা ভাতি দেবোঽখিলেশঃ ॥ ৫৭॥

ইতি শ্রীমদধ্যাত্মরামাযণে উমামহেশ্বরসম্বাদে

বালকাণ্ডে সপ্তমঃ সর্গঃ ॥ ৭॥

সমাপ্তোঽযং বালকাণ্ডঃ

Encoded and proofread by Nagaraj Balijepalli nagaraj at iastate.edu

Proofread by Sunder Hattangadi

Revised by Agne Easwaran easwaranpsa at rediffmail.com

Adhyatma Ramayana ( Balakanda ) Lyrics in Bengali PDF
% File name : adhyaatmaRam.itx
% Text title : adhyAtma rAmAyaNa
% Texttype : pramukha
% Author : Traditional
% Subject : philosophy/hinduism/religion
% Transliterated by : Nagaraj Balijepalli
% Proofread by : Nagaraj Balijepalli , Sunder Httangadi sunderh at hotmail.com, Agne Easwaran easwaranpsa at rediffmail.com
% Description/comments : ????Source
% Latest update : july 22, 2006, June 8, 2013
% Send corrections to : sanskrit@cheerful.com
This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission. Please help to maintain respect for volunteer spirit.

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ February 3, 2015 ] at Stotram Website